শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ পঞ্চত্রিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ পঞ্চৱিংশঃ সর্গঃ ॥

## শ্রীরামেণানুযুক্তেন ৱিশ্ৱামিত্রেণ তাটকাযা জন্মৱিৱাহশাপাদিপ্রসঙ্গং শ্রাৱযিৎৱা তস্য তাটকাৱধায প্রেরণম্

অথ তস্যাপ্রমেযস্য মুনের্ৱচনমুত্তমম্।
শ্রুৎৱা পুরুষশার্দূলঃ প্রত্যুৱাচ শুভাং গিরম্॥ **1.25.1** ॥

অল্পৱীর্যা যদা যক্ষী শ্রূযতে মুনিপুঙ্গৱ।
কথং নাগসহস্রস্য ধারযত্যবলা বলম্॥ **1.25.2** ॥

ইত্যুক্তং ৱচনং শ্রুৎৱা রাঘৱস্যামিতৌজসঃ।
হর্ষযঞ্শ্লক্ষ্ণযা ৱাচা সলক্ষ্মণমরিন্দমম্॥ **1.25.3** ॥

ৱিশ্ৱামিত্রোঽব্রৱীদ্ ৱাক্যং শৃণু যেন বলোৎকটা।
ৱরদানকৃতং ৱীর্যং ধারযত্যবলা বলম্॥ **1.25.4** ॥

পূর্ৱমাসীন্মহাযক্ষঃ সুকেতুর্নাম ৱীর্যৱান্।
অনপত্যঃ শুভাচারঃ স চ তেপে মহত্তপঃ॥ **1.25.5** ॥

পিতামহস্তু সুপ্রীতস্তস্য যক্ষপতেস্তদা।
কন্যারত্নং দদৌ রাম তাটকাং নাম নামতঃ॥ **1.25.6** ॥

দদৌ নাগসহস্রস্য বলং চাস্যাঃ পিতামহঃ।
ন ৎৱেৱ পুত্রং যক্ষায দদৌ চাসৌ মহাযশাঃ॥ **1.25.7** ॥

তাং তু বালাং ৱিৱর্ধন্তীং রূপযৌৱনশালিনীম্।
জম্ভপুত্রায সুন্দায দদৌ ভার্যাং যশস্ৱিনীম্॥ **1.25.8**॥

কস্যচিত্ত্ৱথ কালস্য যক্ষী পুত্রং ৱ্যজাযত।
মারীচং নাম দুর্ধর্ষং যঃ শাপাদ্ রাক্ষসোঽভৱৎ॥ **1.25.9**॥

সুন্দে তু নিহতে রাম অগস্ত্যমৃষিসত্তমম্।
তাটকা সহপুত্রেণ প্রধর্ষযিতুমিচ্ছতি॥ **1.25.10**॥

ভক্ষার্থং জাতসংরম্ভা গর্জন্তী সাভ্যধাৱত।
আপতন্তীং তু তাং দৃষ্টৱা অগস্ত্যো ভগৱানৃষিঃ॥ **1.25.11**॥

রাক্ষসৎৱং ভজস্ৱেতি মারীচং ৱ্যাজহার সঃ।
অগস্ত্যঃ পরমামর্ষস্তাটকামপি শপ্তৱান্॥ **1.25.12**॥

পুরুষাদী মহাযক্ষী ৱিকৃতা ৱিকৃতাননা।
ইদং রূপং ৱিহাযাশু দারুণং রূপমস্তু তে॥ **1.25.13**॥

সৈষা শাপকৃতামর্ষা তাটকা ক্রোধমূর্চ্ছিতা।
দেশমুৎসাদযত্যেনমগস্ত্যাচরিতং শুভম্॥ **1.25.14**॥

এনাং রাঘৱ দুর্ৱৃত্তাং যক্ষীং পরমদারুণাম্।
গোব্রাহ্মণহিতার্থায জহি দুষ্টপরাক্রমাম্॥ **1.25.15**॥

নহ্যেনাং শাপসংসৃষ্টাং কশ্চিদুৎসহতে পুমান্।
নিহন্তুং ত্রিষু লোকেষু ৎৱামৃতে রঘুনন্দন॥ **1.25.16**॥

নহি তে স্ত্রীৱধকৃতে ঘৃণা কার্যা নরোত্তম।
চাতুর্ৱর্ণ্যহিতার্থং হি কর্তৱ্যং রাজসূনুনা॥ **1.25.17**॥

নৃশংসমনৃশংসং ৱা প্রজারক্ষণকারণাৎ।
পাতকং ৱা সদোষং ৱা কর্তৱ্যং রক্ষতা সদা॥ **1.25.18**॥

রাজ্যভারনিযুক্তানামেষ ধর্মঃ সনাতনঃ।
অধর্ম্যাং জহি কাকুৎস্থ ধর্মো হ্যস্যাং ন ৱিদ্যতে॥ **1.25.19**॥

শ্রূযতে হি পুরা শক্রো ৱিরোচনসুতাং নৃপ।
পৃথিৱীং হন্তুমিচ্ছন্তীং মন্থরামভ্যসূদযৎ॥ **1.25.20**॥

ৱিষ্ণুনা চ পুরা রাম ভৃগুপত্নী পতিৱ্রতা।
অনিন্দ্রং লোকমিচ্ছন্তী কাৱ্যমাতা নিষূদিতা॥ **1.25.21**॥

এতৈশ্চান্যৈশ্চ বহুভী রাজপুত্রৈর্মহাত্মভিঃ।
অধর্মসহিতা নার্যো হতাঃ পুরুষসত্তমৈঃ।
তস্মাদেনাং ঘৃণাং ত্যকত্বা জহি মচ্ছাসনান্নৃপ॥ **1.25.22**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে পঞ্চৱিংশঃ সর্গঃ ॥